क्रं.नं. २८८९

2477

माधवाचार्य - ब्रह्मगीतातात्पर्यव्याख्यादीपिका

सूतसंहितांतर्गत ४६४/२६

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(1)

॥ अथश्रीसूतसंहितांतर्गतब्रह्मगीतायाः प्रारंभः ॥ श्रीरांवंदे ॥ ॥ छ ॥ ॥

॥ ॐ ॥

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

(2)



॥श्रीगणेशायनमः॥श्रीशंकरंवंदे॥ ॥ॐनमःश्रीशंकरानंदगुरुपादांबुजन्मने॥सविलासमहामोहग्राहग्रासैककर्मणे॥१॥
एवमुपनिषदेकसमधिगम्यस्यब्रह्मात्मैकत्वज्ञानस्यनिःश्रेयससाधनत्वमुक्तंएतच्चसर्वशाखासंमतमितिदर्शयितुमैतरेयकतैत्ति

१

॥मुनयऊचुः॥भगवतासर्वमाख्यातंसंक्षेपाद्विस्तरादपि॥इदानींश्रोतुमिच्छामोब्रह्मगीतामनुत्तमां॥१॥सर्वविज्ञा
नरत्नानामाकरस्यमहात्मनः॥कृष्णद्वैपायनस्यैवभगवांच्छिष्यःसुशिक्षितः॥२॥त्वयैवाविदितंकिंचिन्नास्तिसत्यंप्र
भाषितं॥यदिप्रसन्नोभगवांस्तन्नोवक्तुमिहार्हसि॥३॥

[illegible]रीयकादिसमस्तोपनिषदर्थस्यसाकल्येनप्रतिपादिकांब्रह्मगीतांवक्तुंमुनीनांप्रश्नमवतारयतिभगवतेति॥ श्रीव १

अथ तां वक्तुं पुरावृत्तमुदाहारति ॥ पुरेति सर्वज्ञः सर्वविदिति ॥ सामान्यतः सर्वं जानातीति सर्वज्ञः विशेषेणापि सर्वं वेत्तीति सर्ववित् ॥ य
द्वा ॥ सर्वश्चासौ ज्ञश्चेति सर्वज्ञः ॥ सर्वजगदात्मकश्चिदेकरसशरीर इत्यर्थः ॥ एवंरूपः परशिव एव हि रजोगुणोपहितः सन्निखिल

सूत उवाच ॥ वक्ष्ये तामादरेणैव ब्रह्मगीतामनुत्तमां ॥ श्रद्धया सहिता यूयं शृणुत स्वस्थचित्तमाः ॥४॥ पुरा कल्पान्तरे देवाः सर्वे
संभूय सादरं ॥ विचार्य सुचिरं कालं वेदानामर्थमुत्तमं ॥५॥ संशयाविष्टचित्तास्तु तपस्तप्त्वा महत्तरं ॥ अभिजग्मुर्विधातारं
प्रष्टुं देवा मुनीश्वराः ॥६॥ यत्रास्ते जगतां नाथः सर्वज्ञः सर्ववित्प्रभुः ॥ महाकारुणिकः श्रीमान्ब्रह्मा भक्तहिते रतः ॥७॥ मे
रुशृंगे वरे रम्ये सर्वयोगिसमावृते ॥ यक्षराक्षसगंधर्वसिद्धैश्च सुसेविते ॥८॥ नानारत्नसमाकीर्णे नानाधातुविचित्रि
ते ॥ शकुंतसंघसंघुष्टे नानातीर्थसमावृते ॥९॥ गुहाकोटिसमायुक्ते गिरिप्रस्रवणैर्युते ॥ मधुरादिरसैः षड्भिः समृद्धैरिव
शोभने ॥१०॥

जगत्सर्जनाय ब्रह्मा भवति ॥ परशिवस्यैवंरूपत्वमाम्नायते ॥ यः सर्वज्ञः सर्वविद्यस्य ज्ञानमयं तप इति ॥

" Joint project of the Rajwade … Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

ब्रं०गी०

तत्रब्रह्मवनंनामशतयोजनमायतं ॥ दशयोजनविस्तीर्णंदीर्घिकाभिःसमावृतं ॥११॥ नानापक्षिसमायुक्तंनानामृगसमाकुलं ॥
स्वादुपानीयसंयुक्तंफलमूलैश्चसंयुतं ॥१२॥ भ्रमद्भ्रमरसंछन्नसुगंधकुसुमद्रुमं ॥ मंदानिलसमायुक्तंमंदातपसमायुतं ॥१३॥ नि
२ शाकरकरैर्युक्तंभूतनमस्तिमहत्तरं ॥ तत्रजांबूनदमयंतरुणादित्यसन्निभं ॥१४॥ नवप्राकारसंयुक्तमशीतिद्वारसंयुतं ॥ महाबल
समापेतैर्द्वारपालैश्चकोटिभिः ॥१५॥ खड्गतोमरचापादिशस्त्रयुक्तैश्चरक्षितं ॥ पुष्पप्रकरसंकीर्णंपूर्णकुंभैश्चसंयुतं ॥१६॥ ज्वल
द्दीपैःसमायुक्तंपुष्पमालाविराजितं ॥ विचित्रचित्रसंयुक्तंभित्तिकोटिसुशोभितं ॥१७॥ मुक्तादामैःसमायुक्तंवितानैर्मौक्तिकैर्यु
तं ॥ अभ्रगामिध्वजैर्युक्तंश्रांशुतोरणसंयुतं ॥१८॥ नृत्तगीतादिभिर्युक्तमप्सरोगणसेवितं ॥ नानाविधमहावाद्यैर्वीणातालैश्चसंयु
तं ॥१९॥ मृदुमध्याग्रशब्दाढ्यंनानाकाहलसंयुतं ॥ वेदघोषसमायुक्तंस्मृतिघोषसमन्वितं ॥२०॥ पुराणघोषसंयुक्तमितिहास
रवान्वितं ॥ सर्वविद्यारवैर्युक्तंसर्वज्ञैश्चसमावृतं ॥२१॥ अगाधजलपर्यंतमवरोधसमन्वितं ॥ रथकोटिसमायुक्तंकोटिको
टिगजावृतं ॥२२॥ कोटिकोटिसहस्रैश्चमहाश्वैश्चसमावृतं ॥ अस्त्रशस्त्रादिसंयुक्तैरसंख्यातबलान्वितैः ॥२३॥ असंख्यानै
र्भटैर्नित्यंरक्षितंपुरमुत्तमं ॥ अस्तिपुण्यवतांप्राप्यमप्राप्यंपापकर्मणां ॥२४॥ तस्मिन्नंतःपुरेस्थुडुसहस्रस्थूणसंयुते ॥ सर्व शिव
लक्षणसंयुक्तेसर्वालंकारसंयुते ॥२५॥ मृगतोरणसंयुक्तेकल्पवृक्षसमन्विते ॥ कंठीरवमुखैर्युक्तेषट्पदस्वरसंयुते ॥२६॥ २

Joint Project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(3A)

मृदुतल्पसमोपेते रत्ननिर्मितमंडपे ॥ देव्या चापि सरस्वत्या वर्णविग्रहया सह ॥२७॥ सर्वज्ञाद्यार्थभूतस्तत्रास्ते निवसति प्रभुः ॥ तत्र देवा द्विजा
गत्वा ददृशुर्लोकनायकं ॥२८॥ नानारत्नसमोपेतं विचित्रमुकुटोज्ज्वलं ॥ रत्नकुंडलसंयुक्तं प्रसन्नवदनं शुभं ॥२९॥ नानारत्नसमोपेतं हारा
भरणभूषितं ॥ महार्हमणिसंयुक्तकेयूरकरशोभितं ॥३०॥ विचित्रकटकोपेतमंगुलीयकशोभितं ॥ उत्तरीयकसंयुक्तं शुक्लयज्ञोपवीति
नं ॥३१॥ नानारत्नसमोपेततुंदबंधविराजितं ॥ चंदनागरुकर्पूरक्षोदादिग्धतनूरुहं ॥३२॥ स्रग्गंधकुंकुमोत्पन्ननानामालाविभूषि
तं ॥ शुक्लवस्त्रपरीधानं तप्तजांबूनदप्रभं ॥३३॥ स्वभासा सकलं नित्यं भासयंतं परात्परं ॥ सुरासुरमुनींद्रैश्च वंद्यमानपदांबुजं ॥३४॥
तं दृष्ट्वा सर्वकर्तारं साक्षिणं तमसः परं ॥ महाप्रीतिसमोपेताः प्रसन्नवदनेक्षणाः ॥३५॥ संजातपुलकैर्युक्ता विवशा गद्गदस्वराः ॥
प्रकाशितसुखाब्ध्यंतर्निमग्ना निर्मलावृतं ॥३६॥ निरस्तनिखिलध्वांताः प्रणम्य वसुधातले ॥ शिरस्यंजलिमाधाय सर्वे देवाः
समाहिताः ॥३७॥

॥ निर्मलावृतमिति ॥ निर्मलैः सनकादिदिव्ययोगिभिः परिवृतमित्यर्थः ॥३६॥

" Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

ब्र॰गी॰ ब्रह्मतत्वमिति ॥ ब्रह्मणः पारमार्थिकं निष्प्रपंचसच्चिदानंदाखंडैकरसरूपं साक्षात्कर्तुमिछतां मुमुक्षूणां प्रत्यगात्मन उक्तलक्षणब्रह्म
रूपबोधकायेत्यर्थः ॥३९॥ साक्षिण इति ॥ सर्वदा सर्ववस्तूनां साक्षिणे साक्ष्याननुप्रविष्टेन स्वरूपचैतन्येन भासकायेत्यर्थः ॥ साक्ष्य
हीनायेति ॥ परमार्थोपाधावज्ञानतत्कार्यस्य साक्ष्यस्याभावाच्चेद्धिहीनं ॥४०॥ सर्वधात्र इति ॥ सर्वस्य जगतो धारयित्रे ॥ विधात्रे निर्मा

३ तुष्टुवुर्हृष्टमीशानं सर्वलोकपितामहं ॥ मुक्तिदं पुण्यनिष्ठानां दुःखदं पापकर्मणां ॥३८॥ देवा ऊचुः ॥ ब्रह्मणे ब्रह्मविज्ञान
दुग्धोदधिविधायिने ॥ ब्रह्मतत्वदिदृक्षूणां ब्रह्मदाय नमो नमः ॥३९॥ कष्टसंसारमग्नानां संसारोत्तारहेतवे ॥ साक्षिणे स
र्वभूतानां साक्ष्यहीनाय वै नमः ॥४०॥ सर्वधात्रे विधात्रे च सर्वद्वंद्वापहारिणे ॥ सर्वावस्थासु सर्वेषां साक्षिणे वै नमो न
मः ॥४१॥ परात्परविहीनाय पराय परमेष्ठिने ॥ परिज्ञानवतामात्मस्वरूपाय नमो नमः ॥४२॥ पद्मजाय पवित्राय पद्म
नाभसुताय च ॥ पद्मपुष्पैः पूज्याय नमः पद्मधराय च ॥४३॥ सुरज्येष्ठाय सूर्यादिदेवतातृप्तिकारिणे ॥ सुरासुरन
रादीनां सुखदाय नमो नमः ॥४४॥

ना
त्र इत्यर्थः ॥ सर्वावस्थास्विति ॥ सर्वेषां प्राणिनां जाग्रदादिसर्वावस्थासु साक्षिचैतन्यरूपेणावस्थितायेत्यर्थः ॥४१॥ परात्पर शिव
विहीनायेति ॥ महदादिभूतभौतिकादिकार्यापेक्षया परं तस्मादपि परमव्यक्तं मायापरपर्यायं तद्रहितायेत्यर्थः ॥४२॥ ३

(5A)

६

विश्वनेत्रायेति ॥ विश्वस्यसर्वस्यनेत्रवत्प्रकाशकायेत्यर्थः ॥ ४५ ॥ विधिहीनायेति ॥ विधिर्विधाताअन्योयस्यनास्तिसतथोक्तः ॥ ४६ ॥
वेधसेविश्वनेत्रायविशुद्धज्ञानरूपिणेवेदवेद्यायवेदांतविधयेवैनमोनमः ॥ ४५ ॥ विधयेविधिहीनायविधिवाक्य
विधायिने ॥ विध्युक्तकर्मनिष्ठानांनमोविद्याप्रदायिने ॥ ४६ ॥ विरिंचायविशिष्टायविशिष्टार्तिहरायच ॥ विषण्णानां
विषादाब्धिविनाशायनमोनमः ॥ ४७ ॥ नमोहिरण्यगर्भायहिरण्यगिरिवर्तिने ॥ हिरण्यदानलभ्यायहिरण्यातिप्रियायच ॥ ४८ ॥
शतानंदायशांतायशोकरज्ञानदायिने ॥ शमादिसहितस्यैवज्ञानदायनमोनमः ॥ ४९ ॥ शंभवेशंभुभक्तानांशंकरायश
रीरिणां ॥ शोकरज्ञानहीनानांशास्त्रविवेनमोनमः ॥ ५० ॥ नमःस्वयंभुवेनित्यंस्वयंभुब्रह्मदायिने ॥ स्वयंब्रह्मस्वरूपायस्व
तंत्रायपरात्मने ॥ ५१ ॥ द्रुहिणायदुराचारनिरतस्यदुरात्मनः ॥ दुःखदायान्यजंतूनामात्मदायनमोनमः ॥ ५२ ॥ वंद्यहीना
यवंद्यायवरदायपरस्यच ॥ वरिष्ठायवरिष्ठानांचतुर्वक्त्रायवैनमः ॥ ५३ ॥ ॥ ॥ ॥

॥ ४७ ॥ ४८ ॥ शतानंदायेति ॥ शतगुणितआनंदोयस्ययद्वाशतसंवत्सरंसुखेनजीवनंयस्यसतथोक्तः ॥ ४९ ॥ ५० ॥
॥ ५१ ॥ ॥ ॥ ५२ ॥ ॥ ५३ ॥

(5)

ब्र०गी०

स्वप्रकाशैकमानायेति ॥ स्वप्रकाशस्वरूपचैतन्यमेकमेव मानं यस्य स तथोक्तः ॥ स्वरूपप्रकाशेनैव प्रकाशमानो न तु मानांतरगम्य इत्यर्थः ॥५१॥
स्तुति हीनायेति ॥ गुणिनिष्ठगुणाभिधाने हि स्तुतिः ॥ सा च परमार्थतो निर्गुणस्य न भवतीति स्तुति हीन ॥५२॥ वेदानामर्थमिति ॥ सम
४ स्तैर्वेदैस्तात्पर्येण प्रतिपादितो योऽर्थः स कीदृग्विध इति पृष्टवंत इत्यर्थः ॥५३॥ इति श्रीमत्काशीविलासक्रियाशक्तिपरमभक्तश्रीमत्त्र्यंबकपा

प्रजापतिसमाख्याय प्रजानां पतये सदा ॥ प्राजापत्यविरक्तस्य नमः प्रज्ञाप्रदायिने ॥५४॥ पितामहाय पित्रादिकल्पनारहिताय च ॥
पिशुनागम्यदेहाय पेशलाय नमो नमः ॥५५॥ जगत्कर्त्रे जगद्धर्त्रे जगद्धंत्रे परात्मने ॥ जगद्दृश्यविहीनाय चिन्मात्रज्योतिषे न
मः ॥५६॥ विश्वोत्तीर्णाय विश्वाय विश्वहीनाय साक्षिणे ॥ स्वप्रकाशैकमानाय नमः पूर्णपरात्मने ॥५७॥ स्तुत्याय स्तुतिहीना
य स्तोत्ररूपाय तत्त्वतः ॥ स्तोतृणामपि सर्वेषां सुखदाय नमो नमः ॥५८॥ सूत उवाच ॥ एवं ब्रह्माणमादित्याः स्तुत्वा भक्तिपु
रःसरं ॥ पृष्टवंतस्तु सर्वेषां वेदानामर्थमादरात् ॥५९॥ ब्रह्मापि ब्रह्मविन्मुख्याः सर्वदेवैरभिष्टुतः ॥ आह गंभीरया वा
चा वेदानामर्थमुत्तमं ॥६०॥ ॥ इति श्रीस्कंदपुराणे सूतसंहितायां यज्ञवैभवखंडे उपरिभागे ब्रह्मगीतासूप
निषत्सु प्रथमोऽध्यायः ॥ ॥१॥ ॥ ॥ ॥ ॥ ॥ ॥

दाब्जसेवापरायणेनोपनिषन्मार्गप्रवर्तकेन माधवाचार्येण विरचितायां सूतसंहितातात्पर्यदीपिकायां यज्ञवैभवखंडे उपरिभागे ब्रह्म

शिव
४

(5A)

अथब्रह्मापिपृष्टंसकलवेदानामर्थंवक्तुमारभमाणस्तस्यविविक्षितस्याद्वितीयनिर्गुणब्रह्मस्वरूपात्मकस्यवेदार्थस्याभिधावृत्त्यविष
यत्वंतावदाह ॥ अवाच्यइति ॥ उक्तविधब्रह्मलक्षणोयोवेदार्थःसोयंशब्देनसर्वप्रकारेणाप्यभिधावृत्त्याप्रतिपादयितुमशक्यएवतस्यनिर्गु
णत्वेनतत्रजातिगुणक्रियादीनांशब्दप्रवृत्तिनिमित्तानामभावात् अतएवश्रुतिस्तस्यवागगोचरत्वंदर्शयतियतोवाचोनिवर्त्तन्तइति ॥ तथा
पीति ॥ एवमभिधावृत्त्यविषयत्वेपिलक्षणावृत्त्याप्रतिपादयिष्यतइत्यर्थः ॥ १ ॥

॥ ब्रह्मोवाच ॥ अवाच्यएववेदार्थःसर्वथासर्वचेतनैः ॥ तथापिवक्ष्येभक्तानांयुष्माकंशृणुतादरात् ॥ १ ॥

तत्रतावदृग्वेदस्यप्राथम्यात्तदीयोपनिषत्प्रतिपाद्यमर्थंवक्तुकामः ॥ [illegible]वपंथाइत्यादिसगुणभागस्यचित्तैकाग्र्यादिजननद्वारानिर्गुणभा
गविषयकादनन्यशेषतयास्वात्मनःफलत्वंतत्त्वात्मैकत्वविज्ञानजनकस्यात्मावाइदमेकएवाग्रआसीदित्यादिनिर्गुणभागस्यैवार्थं
संगृह्णाति ॥ आत्मसंज्ञइत्यादिना ॥ तत्रजलविकारस्यतरंगबुद्बुदादेर्वस्तुतःकारणजलस्वरूपानतिरेकवदात्मस्वरूपविकारात्मकका
र्यप्रपंचस्यापिकारणभूतादद्वितीयात्परमेश्वरादव्यतिरिक्तत्वंसाधयितुंतत्सकाशात्सृष्टिराम्नायते ॥

(6)

ति॥

श्र०गी० आत्मावाइदमेकएवाग्रआसीन्नान्यत्किंचनमिषत्सईक्षतलोकान्नुसृजाइतिसइमांल्लोकानसृजत॥ अस्याःश्रुतेरर्थंब्रूते॥ आत्मेति॥ आ
त्मेत्युपादानकारणतयास्वकार्यभूतंसर्वंजगदंतर्बहिश्चव्याप्नोतीत्यात्मा॥ उक्तंहि॥ यच्चाप्नोतियदादत्तेयच्चात्तिविषयानिह॥ यच्चास्यसं
ततोभावस्तस्मादात्मेतिगीयतइति॥ सचात्मसंज्ञःसच्चिदानंदलक्षणःपरशिवएव॥ नतुप्रधानंपरमाण्वादिकंवापराभिमतंतस्याचे
५ तनत्वेनानात्मत्वात्॥ यतोयंशिवःअतएवशुद्धःअशुद्धिकर्मसंबंधहेतुत्वाद्भगवतितस्मिंस्तत्संबंधस्यचप्रागेवनिरस्तत्वात्॥ उक्तंहि॥

आत्मसंज्ञःशिवःशुद्धएकएवाद्वयःसदा॥ अग्रेसर्वमिदंदेवाआसीत्तन्मात्रमास्तिकाः॥ २॥

ब्रह्मणःकर्मसंबंधाभाववत्त्वादपराकृतिरिति॥ नस्याद्वयइति॥ निरूपणेनविजातीयभेदनिरासः॥ एवकारेणसजातीयांतरनिरा
सः॥ एकइतिस्वगतभेदनिरासः॥ सृष्टिप्राक्कालवत्सृष्ट्युत्तरकालमपिनिर्विकारतयातस्यपरमेश्वरस्येदृग्रूपत्वमितिद्योतयि
तुंसदेतिविशेषणं॥ अग्रेसृष्टेःप्राक्कालेइदंपरिदृश्यमानंनामरूपात्मकंसर्वंजगदुक्तलक्षणात्मस्वरूपमेवासीत्॥ अव्याकृता शिव
त्मनातत्स्वरूपएवलीनमासीदित्यर्थः॥ २॥ ५

(6A)

मात्रं चोत्स्यव्यवच्छेदं दर्शयति ॥ तम इति ॥ ततस्तस्माद्धात्मस्वरूपादन्यन्नामरूपात्मना पृथग्भूतं भिन्नं स्फुरत्प्रकाशमानं किमपि वस्तु नासीदित्य
र्थः ॥ एवं कारणात्मना सद्भावप्रतिपादनादसदेव कार्यमुत्पद्यत इति पक्षो निरस्तः ॥ नन्वेवमसंगोदासीनस्य स्वप्रतिष्ठस्याद्वितीयस्याशरीरस्यात्मनः
स्रष्टव्यपर्यालोचनरूपमीक्षणं कथं संभवतीत्याशंक्याह ॥ स पुनरिति ॥ अतीतकल्पसंचितानि प्राणिकर्माणि स्वकारणभूतमायया सह संहृति
समये परशिवस्वरूपे वासनाशेषतया प्रलीनानि कालवशात्स्वच्छं तत्फलप्रदानोन्मुखलक्षणमतिशयं प्राप्नुवंति ॥ तस्माच्च कालरूपेण तत्साको
त्सर्गुः परमेश्वरस्य सिसृक्षाहेतुभूतः कर्मजनितो पूर्वोवांतरपर्यायः संस्कार उद्बुध्यते उद्बुद्धाच्च तस्मात्तस्य परशिवस्यांशक्तिस्त्रिगुणात्म
या

ततो नान्यन्निमिषत्किंचित्स पुनः कालपाकतः ॥ प्राणिनां कर्मसंस्कारात्स्वशक्तिगतसत्त्वतः ॥ ३ ॥ स ऐक्षत जगत्सर्वं नु सृजा इति शंकरः ॥

यातत्र रजस्तमोभ्यामसंस्पृष्टं यद्विशुद्धं सत्त्वं तस्माद्धेतोस्तदुपाधिकल्पात्सिसृक्षारूपमीक्षणं जायत इत्यर्थः ॥ कथमीक्षितवानित्यत उच्यते ॥ ना
मरूपात्मकं यदिदं सर्वं जगदेतावंतं कालं विलीनमासीत् तत्तनु सृजेइति नु शब्दो वितर्के तत्सृजामि इत्येवंरूपेणेक्षितवानित्यर्थः ॥ अत्र सर्वं
जगदिति वदता लोकान्नु सृजा इति भौतिकलोकसृष्टिप्रतिपादिका याः श्रुतेराकाशादिभूतसृष्टिरपि विवक्षिता ॥ सा तूपसंहारन्या
येन सिद्धिति योजनाभावान्न पृथगुक्तेत्यभिप्रायो वर्णितः ॥ ३ ॥

ध्रः

(७)

ब्रु०गी०

एवमीक्षणानंतरं किं कृतवानिति तत्राह ॥ सपुनरिति ॥ अंभोमरीचीर्मरमापइतियेलोकाः क्रत्यानुक्रांतास्तानेतान्सर्वाल्लोकान्सपरमेश्वरः प्रभुः स्वतंत्रोपि

सूर्याचंद्रमसोधातायथापूर्वमकल्पयदितिश्रुतेरतीतकल्पक्रमानुसारेणैव ॥ आत्मीयशक्तितः ॥ आत्मनश्च स्वस्य संबंधिनीजगदाकारेणविवर्त्तमाना

याःत्रिगुणामायाशक्तिस्तद्बलात्सम्यकूस्रष्टवानित्यर्थः ॥ अंभः प्रभृतीनांनिर्वचनंचश्रुत्यैवप्रतिपादितं ॥ अदोंभः परेणदिवंद्यौः प्रतिष्ठांतरिक्षंम

६ चे रीचयः पृथिवीमरोयाअधस्तात्ताआपइति ॥ स्वर्लोकादिसत्यलोकां [redacted] ता अंभः शब्दवाच्याः ॥ मरीचयइत्यंतरिक्षलोकः ॥ मरइतिमर्त्याश्रि

तोभूर्लोकस्तस्यअधस्तादतलाद्याः सप्तअप्शब्दवाच्याइतिनूस्याः श्रुतेरर्थः ॥ अत्रस्रष्टुरात्मनः परमेश्वरत्वमुक्तं ॥ तथात्वंचभगवद्भाष्यकारैरर

प्यात्मगृहीतिरितरवदुत्तरादित्यधिकरणस्यप्रथमवर्णकेनिर्णीतं ॥ तथाहि ॥ किमत्रस्रष्टृत्वेनोक्तआत्माविराट् उतपरमेश्वरइतिविशयेआत्म

सपुनः सकलानेतांल्लोकानात्मीयशक्तितः ॥ ॥ यथापूर्वंक्रमेणैवसुराअस्रजतप्रभुः ॥

नभआकाशःसंभूतइतिपरमेश्व

रकर्तृकस्रष्टेराकाशादिमहाभूतविषयत्वादत्रचसइमांल्लोकानस्रजतेतिभूतसृष्टिव्यतिरेकेणविराट्कर्तृकलोकस्रष्टेरेवोपादानात्ताभ्योगामान

यत्ताभ्योश्वमानयदितिगवानयनादिशरीरधारिव्यवहारदर्शनादेकएवेत्यादितीयत्वावधारणस्यचस्वविकारप्रपंचापेक्षयाप्युत्पत्तेर्विराडेवात्रस्रष्ट

त्वेनोक्तआत्मेतिप्राप्तेभिधीयते ॥ उपरिष्टाद्धिपृथिवीवायुराकाशआपोज्योतींषीत्यादिनामहाभूतैः सहसर्वकार्यजातमनुक्रम्यसर्वंतत्प्रज्ञानेत्रमितिप्र

ज्ञाब्रह्मपरत्वश्रवणादुपक्रमेपिमहाभूतसृष्टिरूपसंहर्त्तव्या ॥ तथाचभूतसृष्टिविषयत्वात्परमेश्वरएवात्रस्रष्टा ॥ एवंचैकत्वावधारणमपिनकदर्थितं शिव

भवति ॥ गवाद्यानयनंतुविधाऽस्तुत्यर्थत्वान्नविरुध्यते ॥ तथाचोक्तं ॥ आत्मावाइदमित्यत्रविराट्स्यादथवेश्वरः ॥ भूतास्रष्टेर्नेश्वरः स्याद्गवाद्यान ६

यनाद्विराट् ॥ भूतोपसंहतेरीशः स्याददैतावधारणात् ॥ अर्थवादोगवाद्युक्तिर्ब्रह्मात्मत्वंविवक्षितमिति ॥

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(7A)

एवंलोकसृष्टिप्रतिपादनेनपरमेश्वरस्वरूपंताटस्थ्येनलक्षयित्वाश्रुत्युक्तलोकपालादिसृष्टेरपिसूक्ष्मस्थूलेक्षकत्वरूपस्यप्रयोजनस्यैक
त्वेनगतार्थत्वादन्यस्यचसर्वस्य॥ सएतमेवसीमानंविदार्येत्यादेः प्रज्ञाप्रतिष्ठाप्रज्ञानंब्रह्मेतिब्रह्मात्मैकत्वलक्षणप्रतिपादकवाक्यशेषत्वात्सर्वे त्व२
षामित्यजकोयमात्मेत्यादिवाक्यसंदर्भप्रतिपादितमर्थंकुकामश्चप्रपदाभ्यांप्रापद्यतब्रह्मेमंपुरुषंसएतमेवसीमानंविदार्यैतयाद्वाराप्राप
द्यतेतिश्रुतिबलात्पादाग्राभ्यांब्रह्मरंध्राच्चप्रविष्टयोः क्रियाशक्तिज्ञानशक्तिलक्षणयोर्ब्रह्मणोर्मध्येकारतेः सआत्मेतिजायमानसंश

प२

तंहरंकेचिदिच्छंतिकेचिद्विष्णुंसुरोत्तमाः॥ ५॥ केचिन्मामेवचेच्छंतिकेचिदिंद्रादिदेवताः॥ केचित्प्रधानंत्रिगुणंस्वतंत्रंके
वलंजडं॥ ६॥

यद्वद्ब्रह्मादिविप्रतिपत्तेरपितद्धेतुत्वान्नमुदाहरति॥ तंहरमित्यादिना। यः स्रष्टृत्वेनोक्तआत्मातमित्यर्थः॥ केचित्प्रधानमिति॥ सांख्याहिचे
तनोपादानत्वेजगतोजडत्वानुपपत्तेस्तदनुरूपमचेतनंसत्वरजस्तमोगुणात्मकंप्रधानमेवजगदुपादानमितितस्यैवस्रष्टृत्वमिच्छंति॥ वे
दांत्यभिमतमायातोवैलक्षण्यमाह॥ स्वतंत्रमिति॥ साहिपरमेश्वराश्रितयातत्परतंत्रा॥ ६॥ ॥ ॥ ॥
त

(8)



अणवः केचिदिति ॥ न्यून परिमाणैर्द्व्यणुकैरधिकपरिमाणस्य घटादेरारंभदर्शनात्पार्थिवादिपरमाणव एव द्व्यणुकादिप्रक्रीययाप्राण्यदृष्टवशा
त्सर्वं जगदारंभंत इति तार्किकाः ॥ शब्दं केचनेति ॥ वैय्याकरणास्तु शब्दब्रह्मैवार्थप्रपंचात्मना विवर्तत इति शब्दस्यैव कारणत्वं वर्णयंति ॥ उक्तं हि ॥
७ अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरं ॥ विवर्ततेर्थभावेन प्रक्रिया जगतो यत इति ॥ ७ ॥ भूतानीचेछंतीति ॥ भूतेभ्य एव भौतिकस्य सर्वस्योत्पत्तिर
री नान्येषामेव स्वष्टत्वं न तु तद्व्यतिरिक्तः कश्चित्स्रष्टा विद्यत इति केषांचित्पक्षः ॥ अपरे तु भ्रांता न कदाचिदनीदृशं जगदिति सर्गमेवं नास्तीतिम

अणवः केचिदिछंति शब्दं केचन मोहिताः ॥ क्षणप्रध्वंसि विज्ञानं केचन भ्रांतचेतसः ॥ ७ ॥ शून्यसंज्ञं सुराः केचिन्निरूपाख्यं विमो
हिताः ॥ किंचिद्भूतानिचेछंति सर्गं केचन भ्रमात् ॥ ८ ॥ तत्र तत्रैव नकोश्वप्रवदंति यथाबलं ॥ सर्वेवादाः श्रुतिस्मृत्योर्विरुद्धा इतिमे
मतिः ॥ ९ ॥ ॥ नि२

न्यंते ॥ तथा श्रुतावपि जगत्कारणेवादिविप्रतिपत्तिर्दर्शिता कालः स्वभावो नियतिर्यदृच्छा भूतानि योनिः पुरुष इति चिंत्यमिति ॥ ९ ॥ श्रुतिस्मृत्यो
र्विरुद्धा इति ॥ सो कामयत बहुस्यां प्रजायेयेति स तदात्मानं स्वयमकुरुत ॥ मत्तः परतरं नान्यत्किंचिदस्ति धनंजय ॥ मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इ
व ॥ मयाध्यक्षेण प्रकृतिः सूयते सचराचरमित्यादिश्रुतिस्मृतिभ्यां चेतनस्य परमेश्वरस्य जगदुपादाननिमित्तत्वयोः श्रवणात्तद्विरुद्धतया वा शिव
दिविप्रतिपत्तेरप्रामाणिकत्वात्तद्धेतुकः संशयो जगत्कारणे नास्तीति सिद्धमात्मसंज्ञः शिव इति प्रतिज्ञातं ॥ ९ ॥ ॥ ॥ ॥ ७

Joint project of the Rajwade Sanshodhan Mandal, Dhule and Yashwantrao Chavan Pratishthan, Mumbai.

(8A)

नन्वेवं श्रुतिस्मृतिविरोधात्सांख्यादिशास्त्राणामप्रामाण्ये कथं तत्र तीर्थकाराणां प्रवृत्तिरित्याशंक्य तत्र प्रवृत्तौ पापमेव कारणमित्याह ॥ पापिष्ठानामि
त्यादिना ॥१०॥११॥ सोपानक्रमत इति ॥ स्वस्वशास्त्रोक्तात्मानात्मविवेकं सामान्येन ज्ञानानाः सांख्यादयस्तद्विशेषप्रतिपादकमुपनिषन्मार्गं परंप
रया समाश्रयंत इत्यर्थः ॥१२॥ विचिंत्य बलाबले इति ॥ वेदमार्गमाश्रितास्ते स्वशास्त्रस्य वेदस्य च बलाबलं विचार्य पुरुषबुद्धिप्रभवत्वेन स्वशा
स्त्रस्य दौर्बल्यं अपौरुषेयत्वेन वेदस्य निर्दुष्टं प्रामाण्यं निश्चित्वा तास्त्यरंत्वाः स्वमार्गं परित्यज्य वेदमार्गमेव केवलमाश्रयंते ॥ अतः सोपानक्र

पापिष्ठानां तु जंतूनां तत्र तत्र स्फुरत्यभाः ॥ प्राक्संसारवशादेव जायते रुचिरास्तिकाः ॥१०॥ तेपि कालविपाकेन श्रद्धयापूतयापि
च ॥ पुरातनेन पुण्येन देवतानां प्रसादतः ॥११॥ कालेन महता देवाः सोपानक्रमतः पुनः ॥ वेदमार्गमिमं मुख्यं प्राप्नुवंति चिरंतनं ॥
॥१२॥ प्राक्संसारवशादेव ये विचिंत्य बलाबले ॥ विवशा वेदमापन्नास्तेपि कैवल्यभागिनः ॥१३॥ वेदमार्गमिमं मुक्त्वा मार्गमन्यं
समाश्रितः ॥ हस्तस्थं पायसं त्यक्त्वा लिहेत्कूर्परमात्मनः ॥१४॥ विना वेदेन जंतूनां मुक्तिर्मार्गांतरेण च तु ॥ तमसापि विना लोकं ते
पश्यंति घटादिकं ॥ तस्माद्वेदोदितो ह्यर्थः सत्यः सत्यं मयोदितं ॥ अन्यन्न वेदितो ह्यर्थो न सत्यः परमार्थतः ॥१६॥

मेण तेषामपि वेदोदिता मुक्तिर्भूयसा कालेन सिद्ध्यतीत्यर्थः ॥१३॥१४॥१५॥ तस्मादिति ॥ यस्मादेवं मार्गांतराणामपि वेदे पर्यवसानं
तस्मादपौरुषेयत्वेन निर्दुष्टवेदवाक्यप्रतिपादित एवार्थः सत्यः न तु वेदव्यतिरिक्तेनेत्यर्थः ॥१६॥

(९)

श्र०गी०

ननुवेदप्रतिपादितोर्थः सत्यश्चेच्छ्रीमाकारकादिभेदभिन्नस्य जगतोप्यात्मवद्वेदार्थतयासत्यत्वंस्यादित्याशंक्य तस्यव्यावहारिकसत्यत्वंप्रतिपादयि
तुं वेदार्थस्य द्वैविध्यमाह ॥ परमार्थइति ॥ वेदेहि कांडद्वयं ॥ तत्रज्ञानकांडे सत्यज्ञानादिलक्षणो योर्थः प्रतिपादितः सएव साक्षात्परमार्थः ॥ कर्म
कांडप्रतिपादितस्तु स्वर्गपश्वादिदेवतालक्षणः प्रपंचः सत्यज्ञानादिलक्षणे परमात्मन्यध्यस्तमायया परिकल्पितः ॥ तदेतत्कांडद्वयस्य कल्पिता
८ कल्पितविषयत्वं प्रागपि प्रपंचितं ॥ सत्याद्वैतपरः कश्चिद्वेदभागः समासतः ॥ कल्पितद्वैतनिष्ठस्तु वेदभागोपरस्तथेति ॥ १७ ॥ १८ ॥ यद्येवं

परमार्थो द्विधा प्रोक्तो मयाहे स्वर्गवासिनः ॥ एकः स्वभावतः साक्षात्परमार्थः स देवतु ॥ १७ ॥ स शिवः सत्यचैतन्यस्फुरणानंतस्वल
क्षणः ॥ अपरः कल्पितः साक्षाद्ब्रह्मण्यध्यस्तमायया ॥ १८ ॥ कल्पितानामवस्तूनां मध्ये केचन मायया ॥ परमार्थतया क्लृप्ता व्य
वहारसुरर्षभाः ॥ १९ ॥ व्यवहारे तु संक्लृप्ताः केचनापरमार्थतः ॥ आकाशादि जगच्छुक्तिरूप्ये तु कथिते मया ॥ २० ॥ ॥ ॥

कल्पितद्वैतपरः कर्मकांडस्तर्हि सर्वोपि वेदार्थः सत्य इति नियमो न स्यादित्यत आह ॥ कल्पितानामिति ॥ सर्वस्य मायापरिकल्पित शिव
त्वेनावस्तुत्वेप्याकाशादिकं व्यावहारिकसत्यत्वेनैव परिकल्प्यते ॥ शुक्तिरूप्यादिकं तु व्यवहारेप्यसत्यतयैवेति ॥ १९ ॥ २० ॥ ॥ ॥ ८

(9A)

११ जगतोपि व्यावहारिकसत्यत्वांगीकारान्नवेदार्थस्य सत्यत्वहानिरित्याह ॥ व्यावहारिकेति ॥ सतिप्रमातरि अबाध्यमानं जगद्व्यावहारिकसत्यं
कदाचिदपि बाधविधुरं सत्यज्ञानानंदैकरसं ब्रह्म हि परमार्थतः सत्यं ॥ तदुभयं वेदः प्रतिपादयति ॥ मार्गांतरं तु नैवमित्यर्थः ॥ २१ ॥ किं न हि
मार्गांतरैः प्रतिपादितमिति तदाह ॥ स्वप्नेत्यादिना ॥ अन्ये सौगतनिर्मिता मार्गाः [redacted] स्वप्नावस्थापरिकल्पितसत्यार्थसदृशान् जाग्रदर्थानेव

११ व्यावहारिकसत्यार्थं साक्षात्सत्यार्थचिद्घनं ॥ उभयं वक्ति वेदस्तु मार्गा नैवं वदंति हि ॥ २१ ॥ स्वप्नावस्थासु संक्लृप्तसत्यार्थे
नसमानिमान् ॥ अर्थानेवामनंत्यन्ये मार्गा हि स्वर्गवासिनः ॥ २२ ॥ जाग्रत्काले तु संक्लृप्तसत्यार्थेन समानिमान् ॥ मार्गा एवा
मनंत्यर्थान्का कथा सत्यचिद्घने ॥ २३ ॥

केवलं प्रतिपादयंति न तु त्रिविधं साक्षात्सत्यमात्मानं ॥ २२ ॥ अन्ये तु वैशेषिकादिमार्गा जाग्रदवस्थायां व्यावहारिकसत्येन (त्वे) मायापरिकल्पि
म२ ता यावेदांतभिन्नास्तत्सदृशान्द्रव्यगुणकर्मलक्षणानर्थानेव केवलं प्रतिपादयंति ॥ अतो मार्गाणां सत्यचिद्घनपारमार्थिके वस्तुनि काक
थाप्रतिपादनप्रसक्तिरपि नास्तीत्यर्थः ॥ २३ ॥

१२

तस्मादिति ॥ व्यावहारिकसत्यस्य जगत एव प्रतिपादनात्पारमार्थिकसत्यचिद्घनवस्तुनोऽप्रतिपादनाच्चेत्यर्थः ॥ एकेकयादृष्ट्येति व्यावहारिकदृ
ष्ट्या ॥ दृष्ट्यंतरेणेति ॥ पारमार्थिकदृष्ट्येत्यर्थः ॥ भ्रांताइति ॥ व्यावहारीकसत्यस्याकाशादिजगतः पारमार्थिकसत्यत्वेनान्यथाग्रहणात्ते भ्रांत
तत्वं ॥ २४ ॥ ननु व्यावहारिकसत्यत्वमेव पारमार्थिकसत्यत्वं नत्येकमेव वस्तु दृष्टिभेदमात्रेण सत्यमसत्यं च भवतीत्यत आह ॥ चैतन्येति ॥ व्यो
हारिकारणेषु सत्सु तत्र घटादिकार्यलयदर्शनात्कारणमात्रस्य सत्यत्वे कार्यस्य चासत्यत्वं प्रसिद्धं तथा च कारणभूतं परशिवचैतन्यमपेक्ष्य तत्कार्य

९

१२

तस्मादेकेकयादृष्ट्या मार्गाः सत्यार्थभाषिणः ॥ दृष्ट्यंतरेणते भ्रांताइति सम्यङ्निरूपणं ॥ २४ ॥ चैतन्यापेक्षया चैत्यं व्योमादि सकलं जग
त् ॥ असत्यं सत्यरूपं तत्कुंभकुड्याद्यपेक्षया ॥ २५ ॥ कुंभकुड्यादयो भावा अपि व्योमाद्यपेक्षया ॥ असत्याः सत्यरूपास्ते शुक्तिरूप्या
द्यपेक्षया ॥ २६ ॥ जाग्रदित्युदितावस्थामपेक्ष्य स्वपनाभिधा ॥ अवस्था सत्यरूपा हि न सत्या हि विवेकसः ॥ २७ ॥ ॥

१३

च्चैत्यं वियदादिभूतजातमसत्यं ॥ तच्च घटकुड्यादिलक्षणस्वकार्यस्य कारणभूतं सत्तदपेक्षया सत्यं ॥ २५ ॥ कुंभकुड्यादयोपि स्वकारणभूतवि
यदादिमहाभूतापेक्षया असत्यास्तेपि सत्यैव प्रमातरि बाध्यमानं शुक्तिरजतादिकमपेक्ष्य सत्याः सति प्रमातर्यबाध्यमानत्वात् ॥ २६ ॥ तथा जाग्रदवस्था
स्वकारणमपेक्ष्यासत्यापि सति प्रमातरि बाधविरहरूपा स्वप्नावस्थावैलक्षण्यात्सत्या ॥ नामपेक्ष्य स्वप्नावस्थापि सत्यैव प्रमातरि बाधितत्वादसत्यैव ॥ शिव
एवमेकस्यैव वस्तुनो व्यवहारदृष्ट्यासत्यत्वं परमार्थोपाधावसत्यत्वं च न विरुध्यत इत्यर्थः ॥ २७ ॥ ॥ शिवोहं ॥ ॥ ॥ ९

(10A)

१४

यद्येवं परमार्थदृष्ट्या असत्यस्यैव सत्यतया अध्यवसायान्मार्गो भ्रान्तास्तर्हि मिथ्याभूतानां तेषां परंपरयापि कथं वेदमार्गो वाप्तिद्वारा परमार्थसत्यचिद्घ
न परशिवस्वरूपावाप्तिहेतुत्वमित्याशंक्य सदृष्टान्तमुपपादयति ॥ तथापीति ॥ यद्यपि स्वप्नावस्था मिथ्याभूता तथापि स्वप्नदृष्टं वस्तु भाविनः सत्यस्य
फलस्य सूचकं भवति ॥ सूचकत्वं भगवता व्यासिनापि सूत्रितं ॥ सूचकस्य हि श्रुतेराचक्षते च तद्विद इति ॥ सा च श्रुतिरेवमाम्नाता ॥ यदा कर्मसु

१४

तथापि स्वप्नदृष्टं तु वस्तु स्वर्गनिवासिनः ॥ सूचकं हि भवत्येव जाग्रत्सत्यार्थसिद्धये ॥ २८ ॥ तथैव मार्गाः सुभ्रान्ता अपि वेदादि
तस्य तु ॥ अर्थस्य प्राप्तिसिध्यर्था भवन्त्येव न संशयः ॥ २९ ॥ तस्माद्वेदतरा मार्गा नैव त्याज्या निरूपणे ॥ वेदनिष्ठस्तु तान्मार्गा
न्न कदाचिदपि स्पृशेत् ॥ ३० ॥ वेदनिष्ठस्तु मार्गास्तान्मोहेनापि स्पृशेद्यदि ॥ प्रायश्चित्ती भवत्येव नात्र कार्या विचारणा ॥ ३१ ॥

काम्येषु स्त्रियं स्वप्नेषु पश्यति ॥ समृद्धिं तत्र जानीयादिति ॥ यथा चैवं तथैव मिथ्याभूता अपि मार्गा वेदप्रतिपादितस्य सच्चिदानंदाखं
डैकरसस्य परमार्थसत्यवस्तुनः सोपानक्रमेण प्राप्तिहेतवो भवन्तीत्यर्थः ॥ २८ ॥ २९ ॥ ॥ ३० ॥ ३१ ॥ ॥ ॥

## मूळ प्रत पाहण्यासाठी संपर्क

---

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com